# संस्कृत-वार्ता:

दिनाङ्कः-08.11.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य बनारस्-रेलस्थानकात् चतुर्णां नूतनानां वंदेभारत्-एक्स्प्रेस्-रेलयानानां हरितध्वजं प्रदर्शितवान्। अस्मिन् अवसरे सः अवदत् यत् वंदेभारत्, नमोभारत्, अमृतभारत् इत्यादीनि रेलयानानि भारतीय-रेल्-इत्यस्य आगामिकालस्य आधारः अभवत्।
- बिहार-विधानसभा-निर्वाचनस्य अन्तिम-चरणस्य निर्वाचन-प्रचारः इतोपि तीव्रम् अभवत्, शीर्ष-नेतारः अन्तिमसमये मतदातृन् प्रार्थयन्ति।
- संसदीयकार्याणां मन्त्री किरेन रिजिजूः अद्य सूचितवान् यत् राष्ट्रपतिः द्रौपदी मुर्मुः दिसम्बर्- प्रथमदिनाङ्कात् ऊनविंशति दिसम्बर्-पर्यन्तं संसदः शीतकालीन सत्रं आयोजनाय सर्वकारस्य प्रस्तावं स्वीकृतवती इति।
- राष्ट्रपतिः द्रौपदी मुर्मूः अंगोला-बोत्सवाना-देशयोः राजकीययात्रायां वर्तते। सा अद्य रात्रौ अंगोला-देशं प्राप्स्यति।
- क्रिकेट्-क्रीडायाम् अद्य ब्रिस्बेन्-नगरस्य गाबायां भारत-आस्ट्रेलिया-देशयोः मध्ये अन्तिमा विंशति प्रति विंशति क्रीडा वृष्ट्या बाधितः, येन भारतेन द्वे एकं अङ्काभ्यां श्रृङ्खला विजिता।

---------------------------------------------

<u>प्रधानमन्त्री-वंदेभारत्-एक्स्प्रेस्</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य बनारस-रेलस्थानकात् चतुर्णां नूतनानां वंदेभारत्-एक्स्प्रेस्-रेलयानानां हरितध्वजं प्रदर्शितवान्। अस्मिन् अवसरे सः अवदत् यत् वंदेभारत्, नमोभारत्, अमृतभारत् इत्यादीनि रेलयानानि भारतीय-रेल्-इत्यस्य आगामिकालस्य आधारः अभवत्। अद्य बनारस-खजुराहो, लखनऊ-सहारनपुर, फिरोजपुर-दिल्ली तथा एर्णाकुलम्-बेङ्गळूरु इति चतुर्णां नूतनानां वंदेभारत् रेलयानानां उद्घाटनेन देशे प्रचलितानां वंदेभारत् रेलयानानां सङ्ख्या षष्ठ्योत्तरैक शततोप्यधिका जाता।

प्रधानमन्त्री अवदत् यत् विश्वस्य विकसितेषु देशेषु आधारभूतसंरचनाः तेषां आर्थिकवृद्धौ महत्त्वपूर्णां भूमिकां निर्वहन्ति इति।

---------------------------------------------

प्रधानमंत्री-नालसा

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां सर्वोच्चन्यायालये विधि-सहायता-वितरण-तन्त्रस्य सुदृढीकरणविषये राष्ट्रिय-सम्मेलनम् उद्घाटितवान्। सः नालसा इत्यस्य समुदायिक-मध्यस्थता-प्रशिक्षण-माड्यूल् इत्यस्य अपि उद्घाटनं कृतवान्, तेनोक्तं यत् सामाजिक-न्यायः तदा एव सम्भवः यदा सर्वेभ्यः न्यायः प्राप्यते तथा च विधि-अभिलेखाः स्थानीयभाषासु उपलभ्यन्ते इति।

---------------------------------------------

बिहार-विधानसभा

बिहार-विधानसभा-निर्वाचनस्य अन्तिम-चरणस्य निर्वाचन-प्रचारः इतोपि तीव्रम् अभवत्, शीर्ष-नेतारः अन्तिमसमये मतदातृन् प्रार्थयन्ति। प्रधानमन्त्री नरेन्द्रमोदी सीतामढी-बेतिया-नगरयोः जनसभां सम्बोधयन् अवदत् यत् एन्. डी. ए. बिहारस्य परम्परायाः विकासस्य संरक्षणाय च केन्द्रितः अस्ति। मुख्यमन्त्री नितीशकुमारः पञ्चोत्तर-द्विसहस्रतम वर्षात् आरभ्य शिक्षायाः स्वास्थ्यस्य च उन्नत्यैः अवधानं दत्तवान्, तत्रैव वी. आई. पी. प्रमुखः मुकेश सहनी इत्येषः अवदत् यत् यूनः परिवर्तनम् इच्छन्ति। जन-सुराज दलस्य संस्थापकः प्रशान्त किशोरः वृत्यवसराणां, समवायानां च अभावे एन. डी. ए.-दलस्य आलोचनाम् अकरोत्। पूर्णिया-नगरे गृहमन्त्री अमितशाहः, आर्. जे. डी. तथा काङ्ग्रेस्-दले मतदातृन् भ्रामयन्ति इति आरोपितवान्, तेनोक्तं यत् बिहार्-राज्यं पुनः अपराधस्य अन्धकारस्य च युगं न प्रत्यागमिष्यति। कटिहार-नगरे काङ्ग्रेस्-नेत्री प्रियङ्का गान्धी अवदत् यत् महाघटबन्धनं सर्वेभ्यः वर्गेभ्यः समान-प्रतिनिधित्वाय प्रतिबद्धः अस्ति तथा च सर्वसमावेशी-विकासाय जाति-आधारित-जनगणनायाः समर्थनम् अपि करोति।

---------------------------------------------

किरेन रिजिजूः

संसदीयकार्याणां मन्त्री किरेन रिजिजूः अद्य सूचितवान् यत् राष्ट्रपतिः द्रौपदी मुर्मुः दिसम्बर्-प्रथमदिनाङ्कात् ऊनविंशति दिसम्बर्-पर्यन्तं संसदः शीतकालीन सत्रं आयोजनाय सर्वकारस्य प्रस्तावं स्वीकृतवती इति। सामाजिकान्तर्जालीये सन्देशे श्रीरिजिजुः अवदत् यत् सर्वकारः एकं रचनात्मकं अर्थपूर्णं च सत्रस्य कल्पानां करोति यत् लोकतन्त्रं सुदृढं करोति, देशवासिनां आकांक्षाः पूरयति।

-------------------------------------------------

## राष्ट्रपतिः मुर्मूः - अंगोला-यात्रा

राष्ट्रपतिः द्रौपदी मुर्मूः अंगोला-बोत्सवाना-देशयोः राजकीययात्रायां वर्तते। सा अद्य रात्रौ अंगोला-देशं प्राप्स्यति। एषा यात्रा एतौ आफ्रिकादेशौ प्रति कस्यापि भारतीयराष्ट्रप्रमुखस्य प्रथमा यात्रा अस्ति। नवम्बर-मासस्य त्रयोदशदिनाङ्कपर्यन्तं प्रवर्तमानायां अस्यां यात्रायां विद्यमानद्वैपाक्षिकसम्बन्धानां समीक्षा, नूतनेषु क्षेत्रेषु सहकारस्य सम्भावनानां च अन्वेषणम् अपि भविष्यति। चीता-परियोजनायां बोत्सवाना-देशेन सह सहकारस्य प्रगतिः अपि कार्यसूच्याम् अन्तर्भवति।

-------------------------------------------------

## वित्तमन्त्री-निर्मला-सीतारामन

वित्तमन्त्री-निर्मला-सीतारामन इत्यनया अद्य असम-राज्यस्य विश्वनाथ-जनपदस्य भोलागुरी-स्थले "स्वाहिद्-कनक-लता-बरुआ-राज्य-विश्वविद्यालयः" इति प्रौद्योगिक-व्यावसायिक-शिक्षायाः क्षेत्रे केन्द्रीकृतस्य राज्यस्य प्रथम- विश्वविद्यालयस्य शिलान्यासं कृतम् । विश्वविद्यालयः आधुनिक-प्रौद्योगिकीषु पाठ्यक्रमं प्रदास्यति। परिसरः एकचत्वारिंशत्यधिक-द्विशतं यावत् एकड़मिते क्षेत्रे विस्तृतः भविष्यति। अस्मिन् अवसरे मुख्यमन्त्री हेमन्ता-बिस्वा सरमा अपि उपस्थितः आसीत्।

-------------------------------------------------

## जम्मू-कश्मीर्

जम्मू-कश्मीर्-प्रदेशे गतरात्रौ कुप्वाडा-जनपदस्य केरन्-सेक्टर्- इत्यत्र सुरक्षाबलैः सह जाते संघर्षे द्वौ बलात् प्रवेशरतौ जनौ मारितौ। सेनायाः प्रवक्त्रानुसारं एल. ओ. सी. इत्यस्य अस्मिन् भागे अन्तः प्रविष्टुं प्रयतमानानां आतंकवादिनां समूहं सैनिकाः अवरोधितवन्तः। सः अवदत्

यत्, यदा उभयोः मध्ये संघर्षः अभवत् तदा प्रचण्डः गोलिका प्रहारः अभवत् यस्मिन् द्वौ अज्ञातौ मारितौ।

---

## उपराष्ट्रपतिः

उपराष्ट्रपतिः सी.पी. राधाकृष्णन-इत्यनेन अद्य जैनपाण्डुलिपीनां संरक्षणार्थं भारतसर्वकारस्य 'ज्ञानभारतं' अभियानस्य प्रशंसा कृता। सः नवदिल्ल्यां आचार्य-हंसरत्न-सूरीश्वर-महाभागस्य अष्टमे अशीत्यधिकैकशतं उपवास-पारणासमारोहे भाषमाणः एतदुक्तवान्, प्राकृत-भाषायाः शास्त्रीय-भाषारूपेण स्वीकृतिम् अपि सः प्रशंसितवान्। भाषणकाले उपराष्ट्रपतिः शान्त्यै वैश्विकमान्यतायै च जैनधर्मस्य गूढयोगदानं प्रकाशितवान्। अस्मिन् अवसरे श्री-राधाकृष्णन-वर्यः तमिलसाहित्ये संस्कृतौ च जैनधर्मस्य ऐतिहासिकप्रभावम् अपि उल्लेखितवान्।

---

## मनोहरलाल-खट्टर

केन्द्रीय-आवासन-नगरकार्य-मन्त्रिण मनोहरलाल-खट्टर-इत्यनेन शुक्रवासरे उक्तं यत् नगरीकरणं विकसितभारतस्य मार्गः अस्ति, एतत् नागरिककेन्द्रितं सर्वसमावेशीयं सुस्थिरं च भवेत् इति। नवदिल्ल्यां पञ्चविंशत्यधिकद्विसहस्रतमवर्षस्य राष्ट्रिय-नगर-सम्मेलनस्य उद्घाटनसत्रं सम्बोधयन् सः अवदत् यत् गतदशके नगरीय-निवेशः द्रुतगत्या वर्धमानः अस्ति, येन स्वच्छ-स्वस्थ-समृद्ध-नगराणां निर्माणाय सर्वकारस्य प्रयत्नाः अधोरेखिताः । मन्त्रिणा क्षमतावर्धनार्थं 'अमृतगानम्–जल् ही जीवनम्', समेत्य अनेकानि उपक्रमाणि प्रारब्धानि। सः 'अर्बन्-इन्वेस्ट्मेण्ट्-विण्डो' इत्यस्य अपि अनावरणं कृतवान्, यत् 'अर्बन्-इन्फ्रास्ट्रक्चर्-परियोजनासु निवेशं सुकरं कर्तुं' नूतनः मञ्चः अस्ति।

---

## क्रिकेट्-क्रीडायाम्

क्रिकेट्-क्रीडायाम् अद्य ब्रिस्बेन्-नगरस्य गाबायां भारत-आस्ट्रेलिया-देशयोः मध्ये अन्तिमा विंशति प्रति विंशति क्रीडा वृष्ट्या बाधितः, येन भारतेन द्वे-एकं अङ्काभ्यां श्रृङ्खला विजिता।

क्रीडायाः अवसानात् पूर्वं, भारतं द्विपञ्चाशत् धावनाङ्केषु आसीत्। यस्मिन् शुभमन् गिलः ऊनत्रिंशत् धावनाङ्केषु, अभिषेक शर्मा च त्रयोविंशति धावनाङ्केषु आसीत्।

**॥ इति वार्ताः ॥**